# संस्कृतवार्ता:

दिनाङ्क : 30/08/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- जापान देशस्य द्विदिवसीय सफल यात्राया: अनन्तरं प्रधानमन्त्री मोदी एस्. सी. ओ. शिखरसम्मेलने भागं ग्रहणाय चीनदेशम् सम्प्राप्तवान्।
- उत्तरप्रदेशस्य नोएडा-नगरे चलदूरभाषीययन्त्राणां कृते भारतस्य प्रथमं टेम्पर्ड्-ग्लास-निर्माण संयंत्रस्य उद्घाटनम् अभवत्।
- केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः प्रथमे त्रैमासिके अष्ट दशमलवोत्तर सप्त प्रतिशतं जी. डी. पी. वृद्धि: प्रशंसितवान् ।
- जम्मू-कश्मीरे भूस्खलनेन मेघविस्फोटेन च विगतेषु द्वादश होरासु एकादश जनाः मृत्युमुपगताः।
- ऋतुविभागेन आगामिषु पञ्चदिनेषु उत्तर-पश्चिम भारते प्रचण्डवृष्टे: संभावना प्रकटिता।
- पञ्जाब राज्ये जलप्रलयानन्तरं सहय्योद्धार कार्याणि युद्धस्तरे प्रचलन्ति।

-------------------------------------------

<u>प्रधानमन्त्री – जापान</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य जापान-देशस्य द्विदिवसीययात्रां समापयत्। यात्रायाः प्रथमे दिने पञ्चदशतमे भारत-जापान वार्षिकसम्मेलने भाग ग्रहणानन्तरं , प्रधानमन्त्री मोदी अद्य टोक्यो-नगरे षोडश राज्य-प्रान्तयोः राज्यपालैः सह मिलितवान्। प्रधानमंत्रीः राज्यानां प्रान्तानां च सहयोगस्य सम्भावनायाः विषये अवधानं दत्तवान् तथा च पञ्चदशतमे वार्षिकसम्मेलने प्रवर्तिते राज्य-प्रान्तीयसहभागित्व-उपक्रमस्य अन्तर्गतं सहभागित्वप्रगतिम् उद्दिश्य कार्यार्थम् आग्रहम् अकरोत्। प्रधानमन्त्री मोदी, राज्यपालान्, भारतीय-राज्य-सर्वकारान्, नूतन-उपक्रमस्य लाभं प्राप्तुं तथा विनिर्माण, प्रौद्योगिकी, नवान्वेषण, मोबिलिटी, नेक्स्ट-जनरेशन् इन्फ्रास्ट्रक्चर स्टार्ट्-अप्स् इत्येतेषु क्षेत्रेषु सहभागित्वं कल्पयितुं प्रार्थयत्। प्रधानमन्त्री भारतस्य विकास-गाथायां

भाग- ग्रहणाय राज्यपालान् आमन्त्रितवान्। वार्तायाः अनन्तरं, प्रधानमन्त्री मोदी, तस्य समकक्षीयेण शिगेरु इशिबा इत्यनेन सह शिन्कान्सेन्-बुलेट्-रेलयानेन मियागी-प्रान्तस्य सेन्डाई-नगरं प्राप्य, सेमिकण्डक्टर्-उत्पादन-उपकरणानां प्रमुख-उत्पादकस्य टोक्यो-एलेक्ट्रान्-समवायस्य भ्रमणम् अकरोत्। एकस्मिन् सोशल-मीडिया सन्देशे प्रधानमन्त्री, भारत-जपान्-मैत्री आगामिषु कालेषु नूतनम् औन्नत्यं प्राप्नुयात् इति उक्त्वा, एतत् सफल-भ्रमणं इति अवोचत्। यात्रायाः अनन्तरं श्री मोदी एस. सी. ओ. शिखरसम्मेलने भागं ग्रहणाय चीनदेशं सम्प्राप्तवान्।

------------------------------------------

## शाङ्घाई-सङ्घटनम्

शाङ्घाई-सहकार-सङ्घटनस्य पञ्चविंशतितमं शिखरसम्मेलनं श्वः चीनदेशस्य तियांजिन्-नगरे आरभ्यते। प्रधानमन्त्री नरेन्द्रमोदी द्विदिवसीय-चर्चायां वैश्विकनेतृभिः सह सम्मिलितः भविष्यति। शिखरसम्मेलने संघटनस्य पञ्चविंशति वर्षाणाम् उपलब्धीनां समीक्षा भविष्यति, दशवर्षीयविकासनीतिः अपि स्वीकृता भविष्यति। चीनदेशः पञ्चमं वारं एस. सी. ओ. शिखरसम्मेलनम् आयोजयति, यस्य अध्यक्षः राष्ट्रपतिः शी जिन्पिङ्ग् अस्ति। विंशतितोप्यधिकाः राष्ट्रप्रमुखाः, अन्ताराष्ट्रियसङ्घटनानां दश-नेतारः च उपस्थिताः भविष्यन्ति। प्रधानमन्त्री नरेन्द्रमोदी, रूसदेशस्य राष्ट्रपतिः व्लादिमिर् पुटिन् च प्रमुखेषु सहभागिषु अन्यतमौ स्तः, येन एतत् शिखरसम्मेलनं सङ्घटनस्य इतिहासे बृहत्तमं महत्त्वाकांक्षी चाभवत्।

------------------------------------------

## अश्वनी-टेम्पर्ड ग्लासः

सूचनाप्रौद्योगिकीमन्त्री अश्विनी वैष्णवः अद्य उत्तरप्रदेशस्य नोएडा-नगरे चलदूरभाषीययन्त्राणां कृते भारतस्य प्रथमं टेम्पर्ड्-ग्लास्-निर्माणसंयंत्रम् उद्घाटितवान्। अस्मिन् अवसरे मन्त्री अवदत् यत् टेम्पर्ड्-ग्लास् इति मोबाईल-दूरवाण्याः महत्त्वपूर्णं उपसाधनम् अस्ति तथा च तस्य

स्वदेशीय-विनिर्माणं मेक-इन-इण्डिया इत्यस्य सफलतायाः कृते तथा प्रधानमन्त्रिण: नरेन्द्र-मोदिन: दूरदृष्टेः प्रमुखं सोपानम् अस्तीति।

श्रीवैष्णवः युवभिः उद्यमतायै आत्मनिर्भरभारताय तथा सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षस्य विकसितभारतस्य निर्माणे योगदानाय आहूतवान्।

---------------------------------------------

<u>पीएम- जी. डी. पी.</u>

भारतस्य जी. डी. पी. इति वास्तविक-सकल-देशीय-उत्पादः वित्तवर्षस्य पञ्चविंशत्यधिक द्विसहस्र-षड्विंशत्यधिक द्विसहस्र तमस्य वर्षस्य एप्रिल्-मासतः जून-मासपर्यन्तं प्रथमे त्रैमासिके अष्ट दशमलवोत्तर सप्त प्रतिशतं वृद्धिः अनुमानितम् अस्ति, यत् पञ्च-त्रैमासिकेषु उच्चस्तरे अस्ति। गत वित्तीय-वर्षस्य चतुर्थ-त्रैमासिके जी. डी. पी. इति चत्वारि दशमलवोत्तर सप्त प्रतिशतं यावत् वर्धितम् आसीत्, परञ्च पूर्वतनस्य वित्तवर्षस्य प्रथम-त्रैमासिके एतत् पञ्च दशमलवोत्तर षड् प्रतिशतम् आसीत्। सांख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयेन वर्तमान वित्तवर्षस्य प्रथम-त्रैमासिके प्रकाशितस्य जी. डी. पी. इत्यस्य त्रैमासिक-प्राक्कलनेत्यस्य अनुसारम्, तस्मिन् एव काले जी. डी. पी. इत्यस्मिन् किञ्चिन्नमात्र वृद्धिः अष्ट दशमलवोत्तर अष्ट प्रतिशतम् आसीत्। वृद्धेः स्वागतम् कुर्वन् केन्द्रीयमन्त्री हरदीप सिङ्घ-पुरीः अवदत् यत् भारतं न केवलं विश्वस्य द्रुतगत्या वर्धमाना बृहत्तमा अर्थव्यवस्था अस्ति अपितु एतानि अङ्कानि स्वयमेव उल्लेखनीयानि सन्ति।

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष्-गोयलः अवदत् यत् भारतं वैश्विक-वृद्धि-यन्त्रम् अस्ति इति।

---------------------------------------------

<u>राजनाथ-रक्षा सिद्धान्तः</u>

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् रक्षायां आत्मनिर्भरता न केवलं विकल्पः अपितु जीवनस्य प्रगत्याः सिद्धान्तः चास्ति इति। अद्य नवदिल्ल्यां रक्षा-सम्मेलनम् अभिसंबोधयन् सः

अवदत् यत्, प्रशासनस्य मन्तव्यम् अस्ति यत् आत्मनिर्भर भारतं स्वस्य सामरिक स्वायत्तस्य रक्षणं कर्तुं शक्नोति इति। आपरेशन् सिन्दूर् इत्यस्य सफलतां प्रकाशयन् श्रीसिङ्घः अवदत् यत्, एतत् अभियानं देशस्य वर्धमानानां स्वदेशीय-रक्षा-क्षमतानां उज्ज्वलं उदाहरणम् अस्तीति।

-------------------------------------------

जम्मू-कश्मीर-

जम्मू-कश्मीरे जम्मू-मण्डलस्य रामबन-रियासी-मण्डलयोः भूस्खलनेन मेघविस्फोटेन च विगतेषु द्वादश होरासु एकादश जनाः मृत्युमुपागताः।

-------------------------------------------

ऋतुविभाग:

भारत-ऋतु-विभागेन अद्य तटीयकर्नाटकस्य, हिमाचलप्रदेशस्य, पञ्जाबस्य, उत्तराखण्डस्य च एकान्तस्थानेषु अतिवृष्टेः सम्भावना प्रकटिता। ऋतुविभागेन अद्य पूर्वोत्तर, बिहार, राजस्थान, गुजरात, दिल्ली, मध्यप्रदेश, महाराष्ट्र तथा दक्षिणभारतस्य केषुचित् भागेषु अत्यधिकवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेनोक्तं आगामिषु पञ्चदिनेषु उत्तर-पश्चिम भारते एकान्तेषु प्रचण्डवृष्टिः निरन्तरं भवितुं शक्नोति, हिमाचलप्रदेशे श्वः यावत्, उत्तराखण्डे च द्वितीयसितम्बरपर्यन्तं प्रचण्डवृष्टिः भविष्यति। पञ्जाब राज्ये जलप्रलयानन्तरं सहय्योद्धार कार्याणि युद्धस्तरे प्रचलन्ति।

।। इति वार्ता: ।।